# २०२१-२२
# शास्त्री-परीक्षा
## खण्डः–प्रथमः, अधिसत्रम्–प्रथमम्
## विषयः- अनिवार्यसंस्कृतम्, पत्रम्- द्वितीयम्

---

**समयः - ३½ होराः**
**सम्पूर्णाङ्कः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. अधोलिखितेषु द्वौ श्लोकौ प्रसङ्गपुरःसरं व्याख्येयौ - १५**

**क.** ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्राताऽपि नो रक्षसि।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बोधौ जिनः पातु वः।।

**ख.** स्वर्गस्त्री यदि तत्कृतार्थमभवच्चक्षुः सहस्त्रं हरे-
र्नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः स्थिते।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात्सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः।।

**ग.** नीताः किं न निशाः शशाङ्कधवलाः नाघ्रातमिन्दीवरं

किं नोन्मीलितमालतीसुरभयः सोढ़ाः प्रदोषानिलाः।

झङ्कारः कमलाकरे मधुलिहां किं वा मया न श्रुतः

निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान्।।

२. **जीमूतवाहनस्य चरित्रचित्रणं कुरुत।**

१२

**अथवा**

**नागानन्दनाटके प्रथमाङ्कवैशिष्ट्यं निरूपयत।**

३. **अधस्तनाः सर्वे प्रश्नाः समाधेयाः-**

८

**क.** नागानन्दनाटके विदूषकस्य नाम किम्?

**ख.** नागानन्दनाटकस्य रचनाकारः कः?

**ग.**नागानन्दनाटकस्य नायकः कः?

**घ.** जीमूतवाहनस्य पितुः नाम किम्?

**ङ.** नागानन्दनाटकस्य कथावस्तु केन जातकेन सम्बद्धम्?

**च.** मित्रावसुः कस्याः भ्राता अस्ति?

छ.	शंखचूडः कः?

ज.	सुनन्दः कस्य सेवकः अस्ति?

**४. अधोलिखितेषु सूत्रत्रयस्य सोदाहरणं व्याख्या विधेया-**

१२

**क.**	इको यणचि।

**ख.**	एङि पररूपम्

**ग.**एचोऽयवायावः।

**घ.**	स्तोःश्चुना श्चुः।

**ङ.**	अकः सवर्णे दीर्घः

**५. सूत्रोल्लेखपूर्वकं कयोश्चिद् द्वयोः सन्धिः करणीयः -**

८

**क.** हरे + अव

**ख.** हरिम् + वन्दे

**ग.** कृष्ण + एकत्वम्

**६. पाणिनेः परिचयो देयः।**

७

**अथवा**

**महाभाष्यस्य परिचयो देयः।**

**७. अधस्तनाः सर्वे प्रश्नाः समाधेयाः -**

८

**क.** बाह्यप्रयत्नाः के सन्ति?

**ख.** तालुस्थानीयवर्णाः के सन्ति?

**ग.**पदसंज्ञाविधायकं सूत्रं किम्?

**घ.** जश्-प्रत्याहारे के वर्णाः?

**ङ.** संहितासंज्ञाविधायकं सूत्रं किम्?

**च.** प्रत्याहारसंज्ञाविधायकसूत्रं किम्?

**छ.** प्रसक्तस्यादर्शनं किं भवति?

**ज.** अचां मध्ये योऽन्त्यः स आदिर्यस्य तत् किं संज्ञं स्यात्?

*********************